PRINTED BOOK

THE VEDIC PATH

Quarterly Journal of Vedic, Indological
and Scientific Research
Gurukula Kangri Vishwavidyalaya,
HARDWAR

To,

If not delivered, please return to :
Dr. R. L. Varshney
Editor, Vedic Path
'Dreamland'
P. O. Gurukula Kangri-249 404
HARDWAR, U. P., INDIA.

र्यनुयोज्यो
: २०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

① श्री प्रपन्न पारिजातं   No-34

पेज = 3

= 34·×13×0·1 c.m.

सूर्यगृहसत्वे अथ-मातापित्रो धारयत्वे

... ...

श्रीमते रामानुजाय नमः इति श्री प्रपन्नपारिजातं समाप्त

② विषय - दर्शन

पेज = 2

= 34.5× 18×0·1 c.m.

बरादनुपत्याविधायितयेत - यतं पादेना ...

निग्रहस्थानरहिते निग्रहस्थानो द्भावनं निरनुयो-ज्यानुयोग:

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वे॰ वा॰ य्यग्रहसत्त्वे भवन्ते तेपिकर्मधाप्येत्त्वेनाभिमता॰ तथा विपसमासवाक्यात् तादृशार्थावुद्धवोपत्तीकारस्याज
पकतया तादृशोद्यमश्रीप्रतिवंधकतावाडम्यमतसिद्धत्वात् भक्तुदपश्येत्यादौ तु सद्वितीयाविभक्तिस्म
रणेन दधिकर्मकदर्शनवोधवत् राजपुरुष इत्यादावपि तु सषष्ठीविभक्तिस्मरणेन राजसंबंधप्रकारक
भेदान्वयबोधनिर्वाहे राजसंबंधिनिरूढलक्षणां स्वीकृत्याभेदान्वयबोधोपगमो निरर्थकः नच षष्ठी
तत्पुरुषादिस्थले तु प्रविभक्तिस्मरणे [illegible] त्वि पवोधस्तदानुद्धस्पराजमातंगा इत्यादिप्रयोगा
पत्तिस्तत्र मातंगादौ राजादीनामन्वयवोधोपपत्तये राजादिपदोत्तरषष्ठ्यादिविभक्तेरनुसंधानस्यावश्य
कत्वे सज्ञानविभक्तिकत्तया राजादौ ऋद्धादिपदार्थस्याभेदान्वयसंभवादिति वाच्यम् यतस्तत्र ऋद्धराजा
दीनामभेदान्वयानुत्पत्त्यानाभियुक्तानामप्रयोगः किंतु समासघटकपदसापेक्षतया राजपदस्यासामर्थ्या
त् सामासासाधुत्वेन सापेक्षत्ववत्तदर्थान्वितस्वार्थपरत्वं स्वार्थप्राप्तस्वप्रवृत्तिप्रहत्वं त्वविशेष्यम् अतएव
शौः शातितपत्रमस्य मानसा तितदास पदादेः सापेक्षता तदर्थैकदेशपशातनहासत्वादावेव शुकरकरणंत्व वै
२ अनिरूपितत्वानामन्वयात् तदर्थान्वितत्वलाभेदान्वयोवा निवेशनीय इतितन्न स्वारसिकलक्षणाम्रह [illegible] ता राम
दृशा) ह्द लानुरोधेन तादृशसमभिव्याहृतानादेस्तथाविधवोधजनकतायाक्लृप्तत्वात्तत्रनिरूढलक्षणाया

सामग्र्याः प्रतिबंधकतारूपम् अस्मन्मते च तादृशानुमित्योत्पत्त्या विषयावच्छिन्नत्वाद्राजकीयः पुरुष इ
त्यादिशाब्दबोधादतिरिक्तविषयतया तादृशसामग्र्याः प्रतिबंधकत्वकल्पनं नास्ति तथा विशेषानुमिति
शाब्दसामग्र्योः सत्वेऽनुमितेरेवोत्पत्तेरपि तु राजकीयः पुरुष इत्याकारकस्वत्वसंसर्गकैकविशेषानुमि
तिप्रतिबन्धतादृशसामग्र्याः प्रतिबंधकत्वमेकमेव कल्पनीयमिति लाघवमिति तदप्यकिंचित्करम्
भवन्मते यत्र यादृशानुमितिः स्वीक्रियते अस्मन्मते तत्र तादृगनुमितेः स्वीकरणीयतयानुमितौ शा
ब्दसामग्र्याः प्रतिबंधकतासाम्यात् उपदर्शितस्थले भवद्भिरनुमितिः स्वीक्रियतेऽस्माभिरपि स्वीक्रि
यते कुतः प्रतिबंधकतारूपमिति भवतापि तादृशशाब्दं प्रति तादृशानुमितिरूपसामग्रीरूपस्य प्रति
बंधकतायाः वाच्यतया साम्याच्च एवं राजपुरुष इत्यादिसमासवाक्यात् स्वत्वसंसर्गकशाब्दबोधप्रती
कात्तादृशशाब्दसामग्र्याः स्वत्वसंसर्गकराजविशिष्टपुरुषतात्पर्यकज्ञानादपि घटितायामभिन्नविषय
कप्रत्यक्षादिकं प्रति प्रतिबंधकताधिक्ये गौरवात् तत्र राजसंबंधिप्रकारकाभेदान्वयबोधस्वीकार एवो
चितिः नन्वेवं भवन्मतेऽपि तादृशाभेदान्वयबोधसामग्र्याः प्रतिबंधकताधिक्येन गौरवमिति वाच्यम्
राजपदस्य राजसंबंधिनि ह्यारसिकलक्षणाया हृदशायामभेदसंबंधेन राजसंबंधिविशिष्टपुरुषे तात्प

गमात् प्रजागरः संप्रजज्ञे धृतराष्ट्रस्य चिंतया २६ विदुरो यत्र वाक्यानि विचित्राणि हितानि च श्रावयामास राजानं धृत
धृतराष्ट्रं मनीषिणं २७ तथा सनत्सुजातेन यत्राध्यात्ममनुत्तमं मनस्तापान्वितो राजा श्रावितो शोकलालसः २८ प्रभा
ते राजसमितौ संजयो यत्र वा विभो ऐकात्म्यं वासुदेवस्य प्रोक्तवानर्जुनस्य च २९ यत्र कृष्णो दयापन्नः संधिमिच्छन्म
हामतिः स्वयमागाच्छमं कर्तुं नगरं नागसाह्वयं ३० प्रत्याख्यानं च कृष्णस्य राज्ञा दुर्योधनेन वै शमार्थे याचमानस्य प
क्षयोरुभयोर्हितं ३१ दंभोद्भवस्य चाख्यानमत्रैव परिकीर्तितं वरान्वेषणमत्रैव मातलेश्च महात्मनः ३२ महर्षेश्चा
पि कथितं चरितं गालवस्य च विदुलायाश्च पुत्रस्य प्रोक्तं चानुशासनं ३२ कर्णदुर्योधनादीनां दुष्टं विज्ञाय मंत्रितं
योगेश्वरत्वं कृष्णेन यत्र राज्ञो प्रदर्शितं ३३ रथमारोप्य कृष्णेन यत्र कर्णोनुमंत्रितः उपायपूर्वं शौटीर्यात्प्रत्या
ख्यातश्च तेन सः आगम्य हास्तिनपुरादुपप्लव्यमरिंदमः पांडवानां यथावृत्तं सर्वमाख्यातवान्हरिः ३५ ते तस्य
वचनं श्रुत्वा मंत्रयित्वा च यद्धितं सांग्रामिकं ततः सर्वं सज्जं चक्रुः परंतपाः ततो युद्धाय निर्याता नराश्वरथद
तिनः नगराद्धास्तिनपुराद्बलसंख्यानमेव च ३७ यत्र राज्ञा ह्युलूकस्य प्रेषणं पांडवान्प्रति श्वोभाविनि महायुद्धे दौ
त्येन कृतवान्प्रभुः ३८ रथातिरथसंख्यानमंबोपाख्यानमेव च एतत्सुबहुवृत्तांतं पंचमं पर्व भारते ३९ उद्योगपर्व।
निर्दिष्टं संधिविग्रहमिश्रितं अध्यायानां शतं प्रोक्तं षडशीतिर्महर्षिणा ४० श्लोकानां षट्सहस्राणि तावंत्येव शतानि
च श्लोकाश्च नवतिः प्रोक्तास्तथैवाष्टौ महात्मना ४१ व्यासेनोदारमतिना पर्वण्यस्मिंस्तपोधनाः अतः परं विचित्रार्थं

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१६ भीष्मपर्वप्रवक्ष्यते जंबूखंडविनिर्माणं यत्रोक्तं संजयेन ह ४४ यत्र यौधिष्ठिरं सैन्यं विषादमगमत्परं यत्र युद्धमभूद्घोरं
दशाहानि सुदारुणं ४५ कश्मलं यत्र पार्थस्य वासुदेवो महामतिः मोहजं नाशयामास हेतुभिर्मोक्षदर्शिभिः ४६ समीक्ष्याधो।
क्षजः क्षिप्रं युधिष्ठिरहिते रतः रथादाप्लुत्य वेगेन स्वयं कृष्ण उदारधीः ४७ प्रतोदपाणिराधावद्भीष्मं हन्तुं व्यपेतभीः वाक्य
प्रतोदाभिहतो यत्र कालेन पाण्डवः गाण्डीवधन्वा समरे सर्वशस्त्रभृतां वरः शिखण्डिनं पुरस्कृत्य यत्र पार्थो महाधनुः ४८
विनिघ्नन्निशितैर्बाणै रथाद्भीष्ममपातयत् शरतल्पगतश्चैव भीष्मो यत्र बभूव ह ५० षष्ठमेतत्समाख्यातं भारते पर्व वि
स्तृतं अध्यायानां शतं प्रोक्तं तथा सप्तदशापरे ५१ पञ्चश्लोकसहस्राणि संख्यया ष्टौ शतानि च श्लोकाश्च चतुराशीतिरस्मि २६
न्पर्वणि कीर्तिताः ५२ व्यासेन वेदविदुषा संख्याता भीष्मपर्वणि द्रोणपर्व ततश्चित्रं बहुवृत्तान्तमुच्यते ५३ सैनापत्येऽभिषि
क्तोऽथ यत्राचार्यः प्रतापवान् ५४ दुर्योधनस्य प्रीत्यर्थं प्रतिजज्ञे महास्त्रवित् ग्रहणं धर्मराजस्य पाण्डुपुत्रस्य धीमतः यत्र सं
शप्तकाः पार्थमपनिन्यू रणाजिरात् ५५ भगदत्तो महाराजो यत्र शक्रसमो युधि सुप्रतीकेन नागेन सह शान्तः किरीटिना ५६ यत्रा
भिमन्युं बहवो जघ्नुरेकं महारथाः जयद्रथमुखा बाले शूरमप्राप्तयौवनं ५७ हतेऽभिमन्यौ क्रुद्धेन यत्र पार्थेन संयुगे अक्षौहि
णीः सप्त हत्वा हतो राजा जयद्रथः ५८ यत्र भीमो महाबाहुः सात्यकिश्च महारथः अन्वेषणार्थं पार्थस्य युधिष्ठिरनृपाज्ञ
५६ या प्रविष्टौ भारतीं सेनामप्रधृष्यां सुरैरपि संसप्तकावशेषं च कृतं निःशेषमाहवे ६० अलम्बुषः श्रुतायुश्च जलसं
धश्च वीर्यवान् सौमदत्तिर्विराटश्च द्रुपदश्च महारथः घटोत्कचादयश्चान्ये निहता द्रोणपर्वणि अश्वत्थामापि चा
त्रैव द्रोणे युधि निपातिते ६२ अस्त्रं प्रादुश्चकारोग्रं नारायणममर्षितः आग्नेयं कीर्त्यते यत्र रुद्रमाहात्म्यमुत्तमं ६३ व्यासः १६
हा १

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्वन् स्वहस्तेन छिन्न शिर इति नरकान्तकः स्व देव सकल प्राणि संहारैकव्रतिक उदन्याय परिश्रान्त मुखेऽग्नि द्यत्र एव ददाति क्रूर रूपः स्वमाश्रिता
न छित्वा देहं भर्जयित्वा ददौ इति क्रूर दास्यं कारयित्वा स्वमाश्रितं वाणं सुरमस्तक कुसुम म्लानि निधानस्यातरक्षेपमेति प्रतिज्ञां कृत्वा
स्वरूपांजलिकृतवतः कराग्र मर्कवन चेदु दनव देव नन्दक धारणस्यन्ते लवणवान् निम्येन नीयाम इति मुखे नयन माहु दयित्वागत
इति लोकगुरोः स्वपितुर्मस्तक छित्वा यानन्तीत्य नु प्रतिग्राम संबन्ध पालहस्तः संचरन्तं सगशिरः कपाल हस्तः संचरन् प्रतिज्ञां प्राविश्य स्वं प्र
कृष्टायं प्रसंचरतीति तिरस्कारो न भवतीति अपायिनिरुपायेन तस्कारः अपयहरंति कामोपहरति व्याधयो पहरति ज्ञानमपहरतीति परो विरोधं क
त्वं विश्वभक्ताग्रं कृत्वा स्वनैव स्वभरणपपुरुक्षभवतीति तिरस्कारं न भवतीह रामान्त्ययेन स्वात्म्य कावस्था याम् पश्चात् स्थित्वा दसं स्वपमेव
वर्द्धितवानिति प्रकारेण स्वस्वरूपं विहाय रूपान्तरमंगी कृत्य स्वयं मुखं दर्शयित्वा अनुनयो कि मुनीनां मातरो भर्तारश्च उदासीना इति स्वयमेव
रोपणजलेपंचिकांविधौ दोत्येन गालमूर्ज विद्वेष्य पलेर्स्यं संचारयित्वा वदयस्माद्वाणं गृहीत्वारक्तपिन्वामृतानमीव ध्येत्वा नारायण नयपुनः सं
बंधेन सदसनामवलंब्य रक्षणं कुर्वन् रक्षितः इति भवनेव सर्वं मारकः अकिंचन्यं कामक कर्मज्ञानभ ति बुतस्य साधारणात्मगुणे बुच
नयविनतादि परीतिः स्वस्य परिपूर्णतया स्थितिः स्वस्वरूपस्य सर्वप्रपन्ने भ्य उपायतामाश्रित्य निर्भरकार्यस्याहं प्राप्तो न भवामीति स्थितिश्च
एतदुभयवन्तो ईश्वरमेवोपायो वेयत्वेन स्वीकृतवतः एव ईश्वं चरणेन यामीन्तु उक्त प्रकारेण सर्वेश्वरः स्वयमेव गतागतावर्चिरादि मार्गेणा परमपदं नीत्वा
नित्यसूरिभिरेकपंक्तौ स्थापयित्वा नित्यकैंकार्यं ददाति श्रीपुरुषोत्तमलोकाचार्यविरचितं हृदयरहस्ये श्रीमते रामानुजाय नमः इति श्री प्रपन्नपरित्राणं स

संपूर्णम्॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

शब्दाद्यावरणानुपलब्धेरभा
भावात् २३

एवमावरणानुपलब्धिरित्येतन्मतं वादिना दूष्यते यद्यावरणं शब्दस्य नोपलभ्यते तदा जलाद्या
वरणमिव [illegible] शब्दाद्यावरणमुपलभ्येतेति अथोत्तरं यदि भवद्भिरनुपलब्धि
तश्चावरणं शब्दस्य नोपलभ्यते तदा अनुपलब्धेरप्यनुपलब्ध्याभावे सिद्धे तदभावादाव
रणाभावासिद्धावावरणासिद्धिरिति २१ धर्मस्यापि नित्यत्वानित्यत्वविकल्पाद्धर्मिणोऽनित्य
त्वसाधनं नित्यसमा यथा शब्दस्य यदनित्यत्वं भवद्भिरुच्यते तन्नित्यमनित्यं वा यदि नित्यं तदा
शब्दवृत्तेरेव तस्य सदातनत्वाच्छब्दस्यानित्यत्वमागतं अथानित्यं तदा शब्दे कदाचिदनित्य-
त्वाभावोस्तीति नित्य एव शब्द इत्युभयथापि शब्दस्यानित्यत्वमिति २२ अनित्यदृष्टान्तसाधर्म्या
त्सर्वानित्यत्वप्रसंगोद्भावनमनित्यसमा यथा यद्यनित्येन घटेन सादृश्याच्छब्दोऽनित्य इत्यु-

नित्यानित्यकार्य्याकार्य्यसमाजातयः

च्यते तदा येन केनचिद्धर्मेण सर्वस्यैव तत्सादृश्यात्सर्वस्यानित्यत्वप्रसंग इति २३ वाद्युक्तहेतो
रन्यकार्येणापि संभवाभिधानं कार्यसमा यथा तत्रैव प्रयत्नानुविधायित्वमुभयथापि संभव
ति घटादिवच्छब्दस्य स्वरूपोत्पत्तौ जलादिवदावरकनिवृत्तौ च अयत्रापि प्रयत्नानुविधायित्व
दर्शनात् तथा च तस्यावरकनिवृत्तिरूपकार्य्यान्तरस्य संभवान्नानित्यत्वनियतत्वमिति २४
क्वचित्कारणसमेति पाठः तस्यापि कारणस्य प्रयत्नानुविधायित्वस्योभयत्र शब्दस्योत्पत्तौ न
दावरकनिवृत्तौ च समानत्वाभिधानमिति रीत्या उक्त एवार्थे पर्यवसानमवसेयं अत्र ग्रंथगौ
रवभयात्सूत्रप्रकारा न दर्शिता अभियुक्तैरन्यत्र तेऽनुसंधेयाः २५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

2

निग्रहस्थानं लक्षयति वादिन इति इदं च यद्यपि छलादावप्यस्ति तथाप्यर्थान्तरादिरूपनि
३ ग्रहस्थानमध्येऽन्तर्भावाददोषः छलत्वादिनापि ज्ञानस्योपयोगित्वात्पृथगुपादानं हेत्वा
भासवत् तदवान्तरभेदान्दर्शयति प्रतिज्ञेत्यादिना तत्र प्रतिज्ञातार्थविरुद्धार्थाभ्युपग-
मः प्रतिज्ञातार्थपरित्यागो वा प्रतिज्ञाहानिः यथा शब्दोऽनित्यः प्रत्यक्षगुणत्वादित्यत्र
सोऽयं गकार इत्यादिप्रत्यभिज्ञाबलात्परेण बाधिते उद्भाविते अस्तु तर्हि नित्यः शब्दः इति नि
त्यत्वमङ्गीकुर्वन्वादी शब्दस्यानित्यत्वप्रतिज्ञां जहाति १ परोक्तदोषोद्दिधीर्षया पूर्वानु
क्तविशेषणविशिष्टतया प्रतिज्ञातार्थकथनं प्रतिज्ञान्तरं यथा क्षित्यादिकं गुणजन्यं कार्य
त्वादित्यत्रादृष्टजन्यत्वेन सिद्धसाधनोद्भावने सविषयकेति गुणविशेषणदानं २ स्वोक्त

वादिनोऽपजयहेतुर्निग्रहस्थानम् प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः
प्रतिज्ञासंन्यासः हेत्वन्तरमर्थान्तरं निरर्थकम्

साध्यविरुद्धहेतुकथनं प्रतिज्ञाविरोधः यथा द्रव्यं गुणभिन्नं रूपादितः पृथक्त्वेनानुपल कर्मादे
म्भत्वादिति ३ स्वोक्तेऽर्थे परेण दूषिते तदपलापः प्रतिज्ञासंन्यासः यथा शब्दोऽनित्य ऐन्द्रिय
कत्वादित्युक्ते परेण सामान्ये व्यभिचारमुद्भाव्य दूषिते स्वोक्तमपलपति केनोक्तं शब्दो
नित्य इति ४ परोक्तदूषणोद्दिधीर्षया पूर्वोक्तहेतुकोटौ विशेषणान्तरोपादानं हेत्वन्त
रं यथा शब्दोऽनित्यः प्रत्यक्षत्वादित्यत्र सामान्ये व्यभिचारोद्भावने जातिमत्त्वे सतीति विशे ३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

षणदर्नं ५ प्रकृतानुपयुक्तार्थकथनमर्थान्तरं यथा नित्यः शब्दः स्पर्शवत्त्वादिति हेतुः हेतुपदं च हि
नोतेस्तुनिप्रत्ययेनिष्पन्नंपदंचसुप्तिङन्तमित्यादि ६ अवाचकशब्दो निरर्थकं यथा शब्दो
नित्यः जबगडदशत्वात् इत्यादि ७ परिषत्प्रतिवाद्यबोधप्रयोजकपदप्रयोगः अविज्ञाता
र्थं तच्च क्लिष्टान्वयमप्रसिद्धार्थकं त्वरितोच्चारितमित्यादिरूपं ८ परस्परानन्वितार्थ
कपदसमूहोऽपार्थकं यथा शब्दः घटः पटः नित्यमनित्यं च प्रमेयत्वादित्यादि ९ अ
वयवानामुत्क्रमेणकथनमप्राप्तकालं यथा शब्दत्वाच्छब्दो नित्य इत्यादि १० यत्किंचि
दवयवशून्यावयवाभिधानं न्यूनं स्पष्टम् ११ अधिकहेत्वादिकथनं अधिकं यथा

अविज्ञातार्थमपार्थकं अप्राप्तकालं न्यूनमधिकं पुनरुक्तं अननुभाषण
मज्ञानमप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयो
गः अपसिद्धान्तो हेत्वाभासश्चेति निग्रहस्थानानि शेषं सुगमम्

शब्दो नित्यः शब्दत्वाच्छ्रावणत्वाच्चेत्यादि १२ अनुवादं विना कथितस्य पुनः कथनं पुनरु
क्तं यथा शब्दोऽनित्यः शब्दोऽनित्य इत्यादि १३ परिषदा त्रिरभिहितस्याप्यननुवादः अ
ननुभाषणं १४ परिषदा विज्ञातस्य वादिना त्रिरभिहितस्य वाक्यार्थस्याबोधः अज्ञानं
१५ उत्तरार्हे परोक्ते बुध्वा पि उत्तरस्यास्फूर्तिवशात् तूष्णींभावः अप्रतिमा १६ असंभवत्का
लांतरककार्यव्यासंगमुद्भाव्य कथाविच्छेदो विक्षेपः १७ स्वपक्षदोषमनुद्धृत्य प

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

४ रपक्षेदोषाभिधानंमतानुज्ञा १८ उद्भावनार्हपरकीयनिग्रहस्थानानुद्भावनंपर्यनुयोज्यो
पेक्षणं १९ निग्रहस्थानरहितेनिग्रहस्थानोद्भावनंनिरनुयोज्यानुयोगः २०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA